M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref./Ser. 405

Title: Navagraha Shanti

405

नवग्रहशांतिः

by गोभिलाचार्यः

Navagraha Shānti	Title
Gobhilāchārya	Author
	Editor
	Year, Vols.
	Publisher
405	Remarks

२९६

२९७

…गोनिल ॥१॥

ॐनमः श्रीसामवेदाय॥ देवदानवगंधर्वाः पिशाचोरगराक्ष
साः। पीड्यंतेग्रहपीडाभिः किंपुनर्भुविमानुषाः॥१॥ आदित्येह
दशोचैवरावणःसगणोहतः। अष्टमेनशशांकेनहिरण्यक
शिपुर्हतः॥२॥ अंगारकेणवक्रेणरामोराज्याद्विवासितः। पांड
वाबुधपीडायांविकर्मणिनियोजिताः॥३॥ गुरुणाजन्मसंस्थे
नहतोराजासुयोधनः। षष्ठेनोशनसायुद्धेहिरण्याक्षोनिपा ॥२॥
तितः॥४॥ शनैश्चरेणसौदासोनरमांसेनियोजितः। राहुणापी

डितोराजानलोभ्रांतोमहीतले॥५॥ केतुपीडांसमासाद्यकं
सासुरोनिपातितः। एतेचान्येचबहवोग्रहदोषैर्निपातिताः
॥६॥ एतेदेवाग्रहाःसर्वेपालयंतिवसुंधरां। तस्मादाहूय
देवांश्चातरुच्छायपंडिताः॥७॥ यच्छंतिसर्वकार्याणिग्रहन
क्षत्रजाःस्मृताः। पूजयंतियथानित्यंशुभनायाद्यदिवास्तुनोः
॥८॥ यस्तुतंनावायंत्येतपूज्यमानाग्रहाःशुभाः। शुभंतांश्चदिश
यछंतितस्माद्यत्नेनपूजयेत्॥९॥ श्रीकामःशांतिकामोवाग्र

गोनि॰
॥२॥

हयज्ञं समाचरेत् ॥ वृष्ट्यायुःपुष्टिकामो वा तथैवाभिचरन्नपि ॥
॥१०॥ यानपत्या न वेन्नारी दुर्नगा वा प्रिया न वेत् ॥ बलकावा
ध्यमीयंते या च कन्या वरार्थिनी ॥११॥ राज्यभ्रष्टो नृपो यश्च दी
र्घरोगी च यो न वेत् ॥ ग्रहयज्ञः स्मृतस्तेषां मानवानां मनीषि
भिः ॥१२॥ ये चैवाचकरिष्यंति यथोक्तं ग्रहमंडलं ॥ तेषामायुश्च ॥२॥
वित्तं च पुत्राः पश्चादयस्तथा ॥१३॥ सर्वशास्त्राण्यनुक्रम्य संक्षि
प्य ग्रंथविस्तरां ॥ ग्रहशांतिं प्रवक्ष्यामि पुराणश्रुतिचोदितां ॥१४॥

पुण्येह्नि विप्रकथिते कुर्याद्ब्राह्मणवाचनं ॥ ग्रहयज्ञस्त्रिधा प्रोक्तः
पुराणश्रुतिकोविदैः ॥१५॥ प्रथमोऽयुतहोमः स्याल्लक्षहोमस्त
तः परः ॥ तृतीयः कोटिहोमश्च सर्वकामफलप्रदः ॥१६॥ अयुते
नाहुतीनां च नवग्रहमखः स्मृतः ॥ तस्य तावद्विधिं वक्ष्ये पुराण
श्रुतिचोदितं ॥१७॥ प्रागुदक्प्रवणे देशे सर्वतो हस्तसंमितं ॥ कुं
डं कार्यं सहस्रार्थे अयुतार्थे द्विहस्तकं ॥१८॥ उर्ध्वं तु द्विगुणं दी
र्घं दक्षिणोत्तरदिग्गतं ॥ अथ यश्च लक्षहोमे तु कोटिहोमे तथैव च ॥

॥१९॥नवग्रहमखेकुंडंऽहस्तमात्रंऽसमंभवेत्।चतुरस्रमथोह
स्तंयोनिवक्त्रंऽसमेखलं॥२०॥चतुरंगुलविस्तारामेखलातदुद्
च्छ्रिता॥मानहीनाधिकंकुंडमनेकभयदंभवेत्॥२१॥कीदृशंब्रा
ह्मणेकुंडंकीदृशंक्षत्रियस्यच।कीदृशंवैश्यलोकस्यशूद्रस्य
कीदृशंभवेत्॥२२॥एकहस्तप्रमाणंतुब्राह्मणेचतुरंगुलं।वी
ण्यंगुलानिहस्तस्तुक्षत्रियस्ययथाविधि॥२३॥अंगुलद्वयह
स्तंतुवैश्यकथितंमया।हस्तांगुलंतुशूद्रस्यइत्येतत्कुंडल ॥३॥

क्षणं॥२४॥खातेतुहस्तमात्रंऽस्याच्छल्यानिचसमुद्धरेत्।घो
षयेत्पंचगव्येनगायत्रीस्मरणेनच॥२५॥आदित्यादिस्थ
नज्ञानाद्ग्निकार्यंऽसमारभेत्।ग्रहकुंडेसमुत्पन्नेब्राह्म
णेभ्योनिवेदयेत्॥२६॥तस्यचोत्तरपूर्वेणद्विहस्तंऽस्थंडिलं
भवेत्।द्विवप्रंचतुरस्रंचवितस्त्युच्छ्रायसंमितं॥२७॥तत्रगो
चर्ममात्रंतुगोमयेनोपलेपयेत्।पुराहस्तंऽस्वहतेकुंडेकुर्या
दग्नेःकरणाटिकां॥२८॥कुंडस्यप्रागुदीच्यांवाप्राच्यामुत्तरतो

श्रीनिली ॥६॥

पिवा।चतुरस्रंचतुर्द्वारंकर्त्तव्यंग्रहपीठकं॥२९॥श्रीकामःसर्व
तःकुर्यात्पुष्ट्यर्थंदक्षिणेनतु।पश्चाद्विजन्मासिध्यर्थेऽशांत्यर्थे
चोत्तरेणतु॥३०॥ऐशान्यांसर्वकामायाग्नेय्यामभिचारिके
नैर्ऋत्यांपुत्रलाभायपुष्ट्यर्थंवायवेनतु।नवग्रहमखेकुर्या ३१
देकैकमृत्विजंसुतं।अथवायुग्ममन्यत्रद्विद्विनाब्रह्मणासह ॥६॥
॥३२॥नवग्रहमखविप्राश्चत्वारोवेदवादिनः।अथवात्विजौ
शांतौद्वावेववश्रुतिकोविदौ॥३३॥गर्त्तस्योत्तरपूर्वेणवितस्तिद्वय

विस्तरं॥वप्रद्वयवृत्तांवेदिंवितस्त्युच्छ्रायसंयुतां॥३४॥सऽस्थाप
नायदेवानांचतुरस्रामुदक्प्लवां।अग्निप्रणयनंकृत्वातस्यामा
वाहयेत्सुरान्॥३५॥ताम्रकास्फाटिकारक्तचंदनास्वर्णकाद्रुमा
रजतादयससीसाकाऽस्याकार्याग्रहाःक्रमात्॥३६॥स्ववर्णै
र्वापटेलेख्यागंधैर्मंडलकेषुच।अथवाप्रतिमाःकार्यालोहमृ
त्पिंडदारुतः॥३७॥ब्राह्मणौभार्गवाचार्यौक्षत्रियावर्कलोहि
तौ।वैश्यौसोमबुधौचैवशेषांशूद्राद्विनिर्दिशेत्॥३८॥जन्मन्त्र

गौ॥नि॥ली
॥५॥

गोत्रिमग्निश्चवर्णस्थानामुखानिच॥ ॐशावाऽरुतेशांतिंग्रहा
स्तेनापमानिताः॥३९॥ अर्कोजातःकलिंगेषुयामुनेषुचचंद्र
माः॥ अंगारकस्त्ववंतीषुमागधायांबुधःस्मृतः॥४०॥ सैंधवेच
गुरुर्ज्जातःशुक्रोभोजकटेस्मृतः॥ शनैश्चरस्तुसौराष्ट्रेराहुर्बर्ब
रकेतथा॥४१॥ अंतर्वेद्यांतथाकेतुरित्येताग्रहसंभवाः॥ सप्त
म्यांभास्करोजातश्चाष्टम्यांचशशिनस्तथा॥४२॥ नवम्यांभार्गवो
जातोदशम्यांमंगलस्तथा॥ एकादश्यांगुरुर्ज्जातोद्वादश्यांचबु

॥५॥

धस्तथा॥४३॥ राहुश्चचतुर्दश्यांसोमापूर्णिमायांतमोजनिः॥ यावद्दं
न्त्रपत्यांतितावज्ञातास्तुकेतवः॥४४॥ शुक्रस्यपुष्यनक्षत्रंगुरोरुत्त
राफाल्गुनी॥ आदित्यस्यविशाखाचपूर्वाषाढाचभूमिजे॥४५॥ बु
धस्यचधनिष्ठाचचंद्रस्यैवतुकृत्तिका॥ रौहिणीचशनैश्चरायाराहो
र्भरणिरुच्यते॥४६॥ अश्लेषाचैवकेतूनांग्रहस्यधोऽपनुक्रमात्॥
यस्यग्रहस्ययज्जोत्रंतत्तेवक्ष्याम्यतःपरं॥४७॥ आदित्यःकाश्यपोगो
त्रश्चात्रेयश्चंद्रमाभवेत्॥ भारद्वाजोभवेद्भौमःकथ्यःसोमेनसौ

मजः॥४८॥जीवस्यचांगिरागोत्रंऽशुक्रस्यभार्गवंतथा॥शनिःसू
र्यैणकथितोराहुःपैठीनसिस्तथा॥४९॥केतवोजैमिनीयाश्च
ग्रहाणामस्त्वदनंतरं॥वक्ष्येहमग्निनामानिनिर्दिष्टानियहेयहे॥
॥५०॥आदित्येकपिलोनामपिंगलःसोमउच्यते॥धूमकेतुस्त
थाभौमेजठराग्निर्बुधेस्मृतः॥५१॥गुरौचैवशिखीनामशुक्रेन
वतिहाटकः॥शनैश्चरेमहातेजाराहौकेतौहुताशनः॥५२॥स
ऽस्मरेद्रक्तमादित्यमंगारकसमन्वितं॥सोमशुक्रौतथाश्वेतौबु

धजीवौतुपिंगलौ॥५३॥मंदंराहूतथाकृष्णौधूम्रंकेतुगणंविदुः॥
मध्येतुभास्करंविद्याच्छशिनंपूर्वदक्षिणे॥५४॥दक्षिणेलोहि
तंविद्याद्बुधंपूर्वोत्तरेणतु॥उत्तरेणगुरुंविद्यात्पूर्वेणैवतुभा
र्गवं॥५५॥पश्चिमेनत्वानिविद्याद्राहुंदक्षिणपश्चिमे॥पश्चि
मोत्तरतःकेतुंस्थाप्यावैशुक्लतंदुलैः॥५६॥भास्करस्योत्त
रेत्रांतुऽसोमायाग्नेरुमांतथा॥दक्षिणेत्वग्निपुत्रस्यस्कंदस्था
नंविधीयते॥५७॥बुधस्यपश्चिमेविष्णुंगुरोःपूर्वेप्रजापतिं॥शु

कस्य पूर्वतः। स्थंडिलेऽग्नेर्यमं तु नैर्ऋते॥५८॥ राहोरुत्तरतः का
लकेतोश्चैव दक्षिणे। ग्रहदेवतयोर्मध्येष्वधिदेवां निवेश
येत्॥५९॥ ग्रहाणां सहनक्षत्रैः प्राच्यां दिशि समर्चयेत्। बलि
माल्योपहारैश्च पूजितेश्च यथाक्रमं॥६०॥ शुक्रार्कौ प्राङ्मुखौ
ज्ञेयौ गुरुसौम्यावुदङ्मुखौ। प्रत्यङ्मुखः शनिः सोमः शेषा दक्षि
णतोमुखाः॥६१॥ वर्णरूपगुणैर्युक्ता न्यासकृत्या वा दयेत्सुरा ॥१॥
न्। अंगारको नवेद्यालोऽतिरिक्तस्ततो बुधः॥६२॥ शुक्रो युवा

चकथितो मध्यमस्तु बृहस्पतिः। मध्यनिरिक्तः सूर्यस्य किंचिद्व
नस्ततः शशी॥६३॥ वृत्तं चंद्रानैश्चरं विद्यात् राहुकेतुं तथैव च॥
द्वादशांगुलं लिखेदर्कं सोमं च द्विगुणं लिखेत्॥६४॥ त्र्यंगु
नवांगुलं प्रोक्तं गुरुश्चैव षडंगुलं। बुधं च समं कुजं सौरिं च त्र्य
द्व्यंगुलं क्रमात्॥६५॥ सोमादर्धांगुलं राहुं केतुं मध्ये षडंगु
लं। वृत्तमंडलमादित्ये चतुरस्रं निशाकरे॥६६॥ त्रिकोणं लो
हिते चैव बुधे बाणं तथैव च। चतुरस्रं गुरोर्दीर्घं पंचकोणं

गोस्तथा॥२७॥धनुःशनैश्चरे विद्याद्राहुं वृत्तंध्वजं ततः हीने हते
नवेद्यानि व्याधितो कस्तथाधिके॥२८॥प्रमाणैस्तु स्नवेस्मिहि
स्तस्मात्प्रामाण्यमालिखेत् सूर्य्यःसोमस्तथाभौमो बुधश्चेजी
वःसितोर्कजः॥२९॥राहुःकेतुरिति प्रोक्ता ग्रहा लोकहितावु
हाःसहस्रदीप्तेरक्ताःनग्रहाणां प्रथमस्तथा॥३०॥ब्रमादिते
२ म षु सर्वाभिनानुमावाहयाम्यहं। सीतांशोःशंखवर्णाभं द्विजरा ॥६॥
जविभोजने॥३१॥वपिपूजां कर्तुमिच्छं सोममावाहयाम्यहं।

ग्रहाणांमतिबलं तीक्ष्णं दीप्ताङ्गारसमप्रभं॥३२॥नित्यं मदा
रूणां च भौममावाहयाम्यहं। पीतऽद्धाविसुतऽसौम्यऽहि
रण्यान्तरणप्रियं॥३३॥इंदुजऽसौम्यनामानं बुधमावाहया
म्यहं। गुरुं सुरगणां पीतानं भर्णानां लोचनानं॥३४॥यजेजी
वांप्राणिनां च गुरुमावाहयाम्यहं। सुरारिषु महावीर्यं मस्त्र
राणां च मंत्रिणं॥३५॥शंखगोक्षीरवर्णाभंऽशुक्रमावाहया
म्यहं। वक्रानुवक्रगमनऽस्वच्छंदगतिचारिणं॥३६॥त्रासि

गो॰ति॰ली
॥९॥

नायसवर्णं सौरिमावाहयाम्यहं।चंद्रार्कयोरसंतेयस्तुयस्ता
बुरसजनेपुनः॥१७॥नीलमेघप्रतीकाशं राहुमावाहयाम्य
हं।ग्रहाणामुपग्रहंश्रेष्ठंग्रहनक्षत्रचारिणं॥१८॥निर्वाणांगा
रवर्णं[illegible]केतुमावाहयाम्यहं।भास्करस्येश्वरं विद्यादुमां
चशशिनस्तथा॥१९॥स्कंदमंगारकस्यापिबुधस्यचतथाह ॥९॥
रिं।ब्रह्माणंचगुरोर्विद्यात्शुक्रस्यापिशचीपतिं॥२०॥शनै
श्चरस्ययमंराहोःकालंतथैवच।केतूनांचित्रगुप्तंचसर्वे

षामधिदेवताः॥२१॥अग्निरापःक्षितिर्विष्णुरिंद्रऐंद्राणीप्रजापतिः।
सर्पाब्रह्माचनिर्दिष्टाःसर्वाःप्रत्यधिदेवताः॥२२॥विनायकंत ×
थादुर्गांवायुमाकाशमेवच।आवाहयेद्व्याहृतिभिस्तथैवा
श्विकुमारकौ॥२३॥द्वात्रिंशद्ग्रहदेवतास्थाप्यादिशांपालाश्चदि
गाताः॥रक्तचंदन[illegible]रवौ सोमेसितंचरात्रिभार्गवे॥२४॥च
मसंतुबुधेजीवेधन्यार्कीराहुकेतुषु।ग्रहवर्णानिदेयानिवा
सांसिकुसुमानिच॥२५॥हयारिकुसुमैःसूर्यंकुमुदेश्चंद्रम

।।मिली
।।१०।।

चयेत।।द्वितिजंब्रह्मपा।पुष्पैश्चंपकैःसोमनंदनं।।८६।।त्रात
पत्रैर्गुरुंपूजयेज्जातीपुष्पैस्तुभार्गवं।मल्लिकाकुसुमैर्मंदंराहुं
कुटजपुष्पकैः।।८७।।केतून्नानाविधैःपुष्पैर्ऋतुकालोद्भवैः
स्तथैः।।धूपामोदस्तुगुग्गुलनिरूपरिष्टाद्धितान्तकं।।८८।।त्रीनन॰
स्थापयेत्प्राज्ञःफलपुष्पसमन्वितं।सर्वेषांचैवदेवानांगाय
त्र्याधूपमाददेत्।।८९।।रवेःऊदुरुकंधूपं॰श्चान्द्रिनस्तुघृताह्नतं। ।।१०।।
भौमेसर्जरसंचैवचाग्गुरु[illegible]बुधेस्मृतं।।९०।।गुरौश्चैवतुरः

कंचशुक्रेबिल्वगरुंतथा।गुग्गुलंमंदवारेतुलाक्षा॰राहो
श्चकेतवे।।९१।।उद्धूयंतेतिमंत्रेणदीपंदद्यादतंद्रितः।।द्राक्षे
द्ध्रपूगनारिंगजंबीरंबीजपूरकं।।९२।।उन्नतीनालिकेरंच
दाडिमंचयथाक्रमं।गुडोदन॰रवेर्दद्यात्सोमायघृतपाय
सं।।९३।।लोहितायहविष्यान्नंबुधेक्षीरोदनंविदुः।दध्योदनं
गुरोर्दद्यात्शुक्रायचघृतोदनं।।९४।।मिश्रितंतिलमुद्गैश्च
नैवेद्यंतुशनैश्चरे।राहोर्माषोदनंविद्धिकेतोश्चित्रौदनंतथा।

गोमिती
॥११॥

॥९५॥ निवेदयेच्चाहुतिनिर्होमं कुर्यादनंतरं। प्रागुत्तरे ण तस्मा
च्चदध्यक्षतसमन्वितं ॥९६॥ पंचपल्लवसंयुक्तं फलवस्त्रसु
गान्वितं पंचरत्नसमायुक्तं पंचगंगजलान्वितं ॥९७॥ स्थाप
येद्वरुणं कुंभं नवरूणं तत्र विन्यसेत्। गंगाद्याः सरितः सर्वाः स
मुद्राश्च सरांसि च ॥९८॥ गजाश्वरथ्यवल्मीकसंगमह्रद्यतो ॥११॥
रुदात्। सर्वाः समुद्राश्च सरांसि च ॥९९॥ गजाश्वरथवल्मी
कसंगमह्रद्यतो रुदात्। मृदमानीय विप्रेंद्र सर्वौषधिसम

स्रोत

नद्यानिष

न्वितं ॥१००॥ स्नानार्थं विन्यसेत्तत्र यजमानस्य धर्मवित्। सर्वे समु
द्राः सरितः सरांसि च नदानि च ॥१०१॥ आयांतु यजमानस्य दु
रितक्षयकारकाः। एवमावाहयित्वैतान परान्मुनिसत्तमः ॥१०२॥
होमं समारभेत्सर्पिर्यवव्रीहितिलादिभिः। अर्कः पलाशाः
खदिरश्चापामार्गोऽथ पिप्पलः ॥१०३॥ औदुंबरः शमी दूर्वा कुशा
श्च समिधः क्रमात्। नैवेद्यं चरोषा होतव्या होममंत्रैरनंतरं ॥[illegible]॥
अष्टावष्टाहुतीर्दद्याद्दैकैकस्य यथाक्रमं। समिधं लक्षणं वक्ष्ये सं

ख्याकामा ऽस्तथैव च ॥१०५॥ विशीर्णा विदला ह्रस्वा वक्रा स्थूला
कृशा द्विधा ॥ कृमिदष्टाश्च दीर्घाश्च निस्त्वचः परिवर्जिता ॥१०६॥
॥ इति गोभिलीयनवग्रहशान्तौ प्रथमप्रपाठकः ॥ छ ॥ विशीर्णायु
र्दयं कुर्याद्विदला व्याधिसंभवं। ह्रस्वायामृत्युमाप्नोति वक्रा विघ्न
करी तथा ॥१॥ स्थूलां संहरते लक्ष्मीं कृशा च रिपुवर्द्धिनी। द्विधा तु ने
त्ररोगांश्च कीटदष्टार्थनाशनी ॥२॥ द्वेष्यं प्रकुरुते दीर्घा प्राणघ्नी नि
स्त्वच स्मृता। अकृशा चैव न स्थूला अशाखा चापलाशनी ॥३॥ स

क्षीरा नाधिका न्यूना समिधः सर्वकामदा। आर्द्राः पक्वाः समच्छे
दां तर्जन्यंगुलिवर्त्तुलां ॥४॥ ईदृशी होमयेत्प्राज्ञः प्राप्नोति विपुलां
श्रियं। श्रौते कर्मणि स्मार्त्ते च समिधः परिकीर्त्तिताः ॥५॥ प्रादेश
मात्रीरारूक्षसमिधश्चार्कसंभवा। दधिमधुघृतसंयुक्ता आदि
त्याय जुहोति च ॥६॥ पर्णाशी चैव सोमाय खदिरी लोहिताय
य च। अपामार्गी बुधश्चाथ अश्वत्थी च बृहस्पतेः ॥७॥ औदुंबरी
तु शुक्राय मंदाय च शमीमयी। दूर्वा राहोः कुशाः केतोर्होम

गोभिली
।।२३।।

मंत्रानुदीरयन् ।।८।। अर्कैर्नाशयते व्याधिं पालाशैः सर्वकामदः
खदिरश्चार्थलाभाय अपामार्गेण रूपवान् ।।९।। अश्वत्थः सर्व
कामायस्तु नगौदुंबरा तथा । शमी शमयते पापं दूर्वा दीर्घायु
रेव च ।।१०।। कृत्वा धर्मार्थकामानां रक्षणं रक्षसां विदुः । अष्टो
त्तरं तु साहस्रं शतं शतं चाष्टाधिकं तथा ।।११।। अष्टाविंशति र
ष्टौ वा एकैकस्य तु होमयेत् । न मुक्तकेशो जुहुयात् नानिपातित
जानुकः ।।१२।। अनिपातितजानौ स्तु राक्षसैर्हूयते हविः । उत्ताने ।।२३।।

नैव हस्तेन अंगुष्ठाग्रेण पीडितं ।।१३।। संहतांगुलिना पाणिस्तु वाग्यतो जु
हुयाद्धविः । होतव्यं तु समिद्धेग्नौ शब्दपात्रार्थसंपदा ।।१४।। विधूमे ललि
हाने च कार्ये होतान्निरतोन्यथा । अल्पतेजाश्च रूक्षश्च विस्फुलिंगी
च सर्वशः ।।१५।। ज्वालाधूमावलीढश्च जाच[illegible]वेदाह्य सिद्धिदः । पद्मा
दिवच्चरुं तु वा मंत्रेण जैस्तु वैः पृथक् ।।१६।। समिक्रमेण जुहुया
तिलहोमस्ततः परं । व्रणमहानि तिस्रः यो यद्धोमः कार्यो द्विजन्मना
।।१७।। आप्यायस्वेति मंत्रेण सोमाय जुहुयात्तु नः । अग्निर्मूर्द्धा दिव

गोशिल
॥९॥

इति मंत्रः सोमाय कीर्त्तयेत् ॥१८॥ अग्ने विवस्वदुषस इति सोमात्म
जस्य च । बृहस्पते परि दीया रथेनेति गुरोः स्मृतः ॥१९॥ शुक्रं ते अ
न्यदिति च शुक्रस्यासौ निगद्यते । शनैश्चरस्य तु पुनः शन्नो देवीरु
दाहृतः ॥२०॥ कयानश्चित्र आभुवदिति राहोरुदाहृतः । केतुं कृण्व
न्निति ब्रूयात् केतूनामेव शांतये ॥ आ वो राजेति रुद्रस्य वह्नेर्होमः स ॥२१॥
मारनेते । मदच्युञ्जत्यमायास्तु अमदेः स्कंद उच्यते ॥२२॥ विष्णो
रिदं विष्णुरिति च अमिश्रेति स्वयंभुवः । इन्द्रमिद्देवतातय इन्द्रायजु

हुयात्पुनः ॥२३॥ नाके सुपर्णमंत्रेण यमाय जुहुयाद्धविः । कालस्य
ब्रह्मजज्ञानमिति होमे प्रकीर्त्तयेत् ॥२४॥ चित्र इच्छिशोरिति च चित्र
गुप्ताय कीर्त्तयेत् । अग्निं दूतं वृणीमह इति वह्नेरुदाहृतः ॥२५॥ उदु
त्तमं वरुणेत्यपां मंत्रः क्षेत्रस्य पते । नमः पृथिव्यै दंष्ट्राय पृथिव्यै
जुहुयात्पुनः ॥२६॥ सहस्रशीर्षाः पुरुष इति विष्णोरुदाहृतः ॥
इंद्राय देवो मरुत्वत इति वाक्स्पत्रास्पते ॥२७॥ नकिरिन्द्र त्वदुत्तरमि
ति देव्याः समाचरेत् । प्रजापतेः पुनर्होमः प्रजापत इति स्मृतः ॥२८॥

गोत्रिस्मृ
॥१५॥

॥या॰संध॰समधत्ते निसर्गाणां मंत्रउच्यते।एषब्रह्मायज्ञस्त्रियई
तिब्रह्मण्एकदाहृतः॥२९॥विनायकस्यवाहनइतिमंत्रोबुधैःस्मृ
ति तः॥इमं॰स्तोममर्हतेंदुगर्होमेप्रकीर्तितः॥३०॥प्राणात्रिःसूमं
हीनांचतद्वद्वायोरुदाहृतः॥आदित्प्रत्नस्यरेतसश्चआकाशस्यप्र
दाहृतः॥३१॥एषोउषाअपूर्व्यस्यश्चिनोर्मंत्रउच्यते।क्षीरसीतिश्रि
यश्चैववास्तोर्वास्तोष्पतेतिच॥३२॥त्र्यंबकमितिमंत्रेणहोमस्तस्य ॥१५॥
निगद्यते।त्रातारमिंद्रमिंद्रस्येत्यग्निस्त्विग्मेनचाग्नये॥३३॥नाकेसु

पर्णेतियमंवेदाहिनिर्ऋतेस्तथा।यदाकदाचवरुणंवातआवातु
वायवे॥३४॥तवाहमितिसोमस्याग्निर्वेतीशस्यचस्मृतः।मयि
वर्चःपरमेष्ठितोदेवेतिविष्णवे॥३५॥पूर्णाहुतिंचमूर्द्धानंदिव
श्त्यन्निपातयेत्।होमांतेदक्षिणांदद्याछांत्यर्थंपुष्टिवर्द्धिनी॥३६
॥आदित्यायतथाधेनुं॰शंखं॰सोमायदापयेत्।भौमेरक्तमनड्वा
ह॰सोमपुत्रायकांचनं॥३७॥गुरोश्चपीतवासा॰शुक्रस्याश्वः
सितस्तथा।कृष्णागौर्मंदस्याराहोःछागस्तथैवच॥३८॥कृष्णा

यसंतथाकेतोःसर्वेषामेवकांचनं।नाशयेन्म्हदुवस्त्वेश्चो त्रिशंनिति
विसर्ज्जयेत॥३९॥सुवर्णेनसमाःकार्यायजमानेनदक्षिणाः॥स
र्वेषामथवागावोदतव्याहेमन्त्रषिताः॥४०॥सुवर्णमथवाद्या
न्मुरुवर्यिनतुष्यातिस्वस्वमंत्रैः प्रदातव्याःसर्वाःसर्वत्रदक्षिणाः
॥४१॥कपिलेसर्वदेवानांपूजनीयासिरोहिणी।तीर्थदेवमयीय
स्मादतःशांतिप्रयच्छमे॥४२॥पुण्यस्त्वंशंखपुण्यानांमंगलानां
चमंगलं।विष्णुनाविधृतोनित्यमतःशांतिंप्रयच्छमे॥४३॥धर्म्म

स्त्वंवृषरूपेणजगदानंदकारकः।अष्टमूर्तेरधिष्ठानमतःशां
तिप्रयच्छमे॥४४॥हिरण्यगर्भगर्भस्थंहेमरूपंविभावसोः।
अनंतपुण्यफलदमतःशांतिंप्रयच्छमे॥४५॥पीतवासस्तुय
स्माद्वैवासुदेवस्यवल्लभः।प्रदानात्तस्यमेविष्णोरतःशांतिंप्रय
च्छमे॥४६॥विष्णुस्त्वमश्वरूपेणयस्मादमृतसंभवः।चंद्रार्कवा
हनोनित्यमतःशांतिंप्रयच्छमे॥४७॥यस्माच्चसर्वयज्ञानामं
गत्वेनव्यवस्थिताः।गावोमूलंडयज्ञानामतःशांतिंप्रयच्छमे॥४८॥

...निरत्नी
॥२१॥

॥ छागोदेवैःपुरासृष्टोयज्ञेषुहविरुत्तमं । यानंविभावसोर्निमतः
शांतिंप्रयच्छमे ॥ ४९ ॥ यस्मादायसकर्माणित्वदधीनानिसर्व
दा । लांगुलाद्यायुधादीनितस्माच्छांतिंप्रयच्छमे ॥ ५० ॥ गावामंगे
षुतिष्ठंतिभुवनानिचतुर्दश । यस्मात्तस्माच्छिवमेस्यादेहलोप
रत्रच ॥ ५१ ॥ यथाहिवास्तुदेस्यनग्र्याच्छून्यासदैवहि । तथाममा ॥२१॥
प्यशून्यास्तुदत्वाजन्मनिजन्मनि ॥ ५२ ॥ यथारत्नेषुसर्वेषुसर्वेदेवाः
प्रतिष्ठिताः । तथाशांतिप्रयंछडरत्नदानेनमेसुराः ॥ ५३ ॥ यथाभू

मिप्रदानस्यकलांनार्हंतिषोडशीं । दानान्यन्यानिशांतिर्मेभूमिं
दत्वानवत्विह ॥ ५४ ॥ एवंसंपूजयेत्तस्माद्विजग्राद्यंविवर्जितः ।
वस्त्रंकांचनरत्नाद्यैर्धूपमाल्यविलेपनैः ॥ ५५ ॥ अनेनविधियाय
स्तुग्रहयज्ञंसमाचरेत् । सर्वान्कामानवाप्नोतिप्रेत्यस्वर्गेमहीय
ते ॥ ५६ ॥ ॐनमोरथआदित्यदीप्यमानःस्वतेजसा । ज्योतिस्थःसर्व
भूतेभ्यःसूर्यःप्रीयतांमम ॥ ५७ ॥ द्विजराजमहाभुंगतारापतिर
निंदितः ॥ मासेमासेक्षयोवृद्धिःससोमःप्रीयतांमम ॥ ५८ ॥ बालः

ऽमारकोयस्तुरक्तवर्णःसुशोभनः॥अव्ययःपृथिवीपुत्रःसनौ
मःप्रीयतांमम॥८९॥सोमपुत्रोबुधःसौम्योबुधोनाममहाय
हः॥आदित्यपथगोयस्तुसबुधप्रीयतांमम॥९०॥बृहस्पतिर्बृ
हतोजोबृहद्बुद्धिर्बृहद्व्रतः॥सुराणांचगुरुर्यस्तुसगुरुःप्रीय
तांमम॥९१॥असुराणांगुरुर्यस्तुग्रहाणांपरमागतिः॥शुक्ल
वर्णःशुक्लदीप्तिःसशुक्रःप्रीयतांमम॥९२॥शनैश्चरःशनैश्चा
रीउग्ररूपोरवेःसुतः॥तैलवर्णःक्रूरदृष्टिःसशनिःप्रीयतांमम॥

॥९३॥असुरःसिंहिकापुत्रोराहुश्चंद्रार्कमर्दनः॥स्थापितस्तुनि
मित्तार्थेसराहुःप्रीयतांमम॥९४॥आयाडदेवसगणःकेतुःक
पोतवाहनः॥सानुचरःसुमेधश्चसकेतुःप्रीयतांमम॥९५॥अन्न
हीनोदहेद्राष्ट्रंमंत्रहीनस्तुऋत्विजं॥यजमानमदाक्षिण्येनास्ति
यज्ञसमोरिपुः॥९६॥तस्मान्नदक्षिणाहीनंकर्तव्यंशांतिमि
च्छता॥संपूर्णयादक्षिणयायस्मादेकोपितुष्यति॥९७॥सदै
वायुतहोमोयंनवग्रहमखःस्मृतः॥विवाहोत्सवयज्ञेषुप्र

शांतिली ॥२९॥

तिष्ठादिषु कर्म्मसु ॥६९॥ निर्विघ्नाय मुनिश्रेष्ठैस्तथा शांतिकपौ
ष्टिके । अद्भुतेषु च सर्वेषु कर्त्तव्यः शांतये सदा ॥७०॥ प्रथमो
ऽयुतहोमोयं लक्षहोमस्ततः परं । तथा परः कोटिहोमस्त्रिधा
होमः प्रकीर्त्तितः ॥७१॥ अथाभिषेकमंत्रैश्च वाद्यमंगल
गीतकैः । कुंभेनस्थापितेनैव होमांते प्रागुदङ्मुखैः ॥७२॥ ॥२९॥
अव्यंगावयवैर्वस्त्रहेमस्रग्दामभूषिते । यजमानस्य क
र्त्तव्यं चतुर्भिः स्नपनं द्विजैः ॥७२॥ सुरास्त्वामभिषिंचंतु ब्रह्म

विष्णुमहेश्वराः । वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः ।
॥७३॥ प्रद्युम्नोऽथानिरुद्धश्च भवंतु विभवाय ते । आखंडलोऽग्नि
र्भगवान्यमो वै निर्ऋतिस्तथा ॥७४॥ वरुणः पवनश्चैव धना
ध्यक्षस्तथा शिवः । ब्रह्मणा सहितो ह्येते दिक्पालाः पांतु वः स
दा ॥७५॥ कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः । बुद्धि
र्लज्जा वपुः शांतिर्माया निद्रा च भावना ॥७६॥ एतास्त्वाम
भिषिंचंतु पुष्टिः कांतिः क्षमा तथा । आदित्यश्चंद्रमा भौमो बु

नौग्रनिली
।।२०।।

क्षेजीवः सितोऽर्कजः।।७७।। ग्रहास्त्वामभिषिंचंतु राहुः केतुश्च
पूजिताः। देवदानवगंधर्वा यक्षराक्षसपन्नगाः।।७८।। ऋषयो
मनवो गावो देवमातर एव चः। देवपत्न्यो ध्रुवा नागा दैत्याश्चा
प्सरसां गणाः।।७९।। अस्त्राणि सर्वशास्त्राणि राजानो वाह
नानि च। औषधानि च रत्नानि कालस्यावयवाश्चये।।८०।। स
रितः सागराः शैलास्तीर्थानि जलदा नवाः। एते त्वामभिषिंचं ।।२०।।
तु सर्वकामार्थसिद्धये।।८१।। ततः शुक्लांबुरधरः शुक्लमाल्यानु

लेपनः। सर्वौषधैः सर्वमंत्रैः स्नापितो वेदपारगैः।।८२।। यजमा
नः सपत्नीकश्च विप्रैस्तु समाहितः। दक्षिणाभिः प्रयत्नेन पू
जयेज्जतविस्मयः।।८३।। तोषितास्तु ग्रहाः सर्वे शांतिं कुर्वंति स
र्वदा। द्विपदे च चतुष्पदे वा पिशाची रेवा दहने गृहे।।८४।। अस्तु नं
चिंतयेद्यस्तु विनाशं याति निश्चितं। यथा बाणप्रहाराणां
कवचं नव निवारणं।।८५।। एवं दैवोपघातानां शांतिर्भवति
वारणं। यथा समुत्थितं यंत्रं यंत्रेण प्रतिहन्यते।।८६।। एवं स

मुद्रितं घोरं ग्रहशांत्या व्यपोहति। अहिंसकस्य दांतस्य धर्म्मा
र्ज्जितधनस्य च ॥८७॥ नित्यं च नियमस्थस्य सदा सानुग्रहा
ग्रहाः। त्रिषु चैव न कुप्यंति ग्रहा वह्निसमप्रभाः॥८८॥ बालेषु व्र
जिते चैव तथा जाप्यरते द्विजे। ग्रहा गावो नरेंद्राश्च ब्राह्मणा
श्च विशेषतः॥८९॥ पूजिताः प्रतिपूज्यंते निर्दहंत्यवमा नि
ताः। यस्तु पीडाकरो नित्यमल्पवित्तस्य च ग्रहः॥९०॥ तमेव पू ॥२२॥
जयेद्भक्त्या द्वौ वा त्रीन्वा यथाविधि। ग्रहाधीना नरेंद्राणामुच्छ्र

याः पतनानि च ॥९१॥ भावाभावौ जगतस्तस्मात्पूज्यतमा ग्र
हाः। ग्रहाणामिदमातिथ्यं कुर्यात्संवत्सरं प्रति॥९२॥ आरोग्यबल
संपन्नो जीवेद्वर्षशतं नरः। यश्चमं श्रावयिष्यंति ग्रहध्याना द्विजा
२३ तयः। आरोग्यबलसंपन्ना जीवेयुः शारदः शतं। होमांते ग्रहपू
जा च प्रायश्चित्तं च स्विष्टकृत्॥९४॥ पूर्णाहुतिमभिषेकं ब्राह्म
णेभ्यश्च दक्षिणा। होमस्य कल्पनाः कार्या ग्रहाणां च विसर्ज
नं॥९५॥ बलिकर्म्म प्रकुर्वीत ततः शेषं समापयेत्। ब्राह्म

णौ।मोचनंकुर्याद्धामदेव्यंततोजपेत्॥८६॥इतिग्रहाणांक
थितानांशांतिश्चायुतहोमिका।सर्वेषामृत्विजांचैवनमस्का
रःपृथक्पृथक्॥८७॥आलोड्यसर्वशास्त्रेभ्यःसमुद्धृत्य
चसारवत्।आयुश्चविद्यांचतथासुखंचधर्मार्थकामान्ब
हूंश्चताचनाशात्तुहृद्यंराजसुपूज्यतांचतुष्टायग्रहाःसर्वमे
त्रहिशांति॥८८॥छ॥ ॥इतिगोभिलाचार्यकृतानवग्रह
शांतिःसमाप्ता॥ ॥शुभंभवतु॥ ॥छ॥श्रीरस्तु॥ ॥श्री
प्राणजीवन